# Shri Ramanuja Varnana Shlokah

# श्रीरामानुजवर्णनाश्लोकाः

## Document Information

Text title : Shri Ramanuja Varnana Shlokah

File name : rAmAnujavarNanAshlokAH.itx

Category : deities_misc, stotra, gurudev

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Description/comments : Ramanujastotraratnavali, Ramanuja Sampradaya. (Prayer to Shri Ramanujacharya)

Latest update : December 25, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# श्रीरामानुजवर्णनाश्लोकाः

श्रीवेङ्कटाध्वरिगुरुभिरनुगृहीताः
॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीमते वेङ्कटाध्वरिणे नमः ॥

एषा भूतपुरी निरीक्षितचरी दोषापहन्त्री मया
श्रीमानत्र गुणाब्धिराविरभवत् रामानुजार्यो मुनिः ।
त्रय्यन्तामृतसिन्धुमन्थनभवद्धय्यङ्गवीनात्मकं
विज्ञानं यदुपज्ञमेव विदुषामद्यापि विद्योतते ॥ १॥

कामादिवैरिगणभीमानवद्यनिजनामाभिलाषगरिमा
वैमानिकार्यसमभूमा मतौ वचनसीमातिलङ्घिमहिमा ।
श्रीमाननूनकलसोमाननो विमलधामावमानितरविः
क्षेमाणि जृम्भयतु भूमावमुत्र स च रामानुजो यतिपतिः ॥ २॥

स जयति रामानुजयतिः
अजयति परवादिनं यदीयोक्तिः ।
सञ्जयति बोधमनघं
रञ्जयति बुधान् व्यथां च भञ्जयति ॥ ३॥

ते मीमांसाशास्त्र-
प्रमथनपरिकलितबुधजनानन्दाः ।
लक्ष्मणमुनेः प्रबन्धाः
लक्ष्मणपूर्वजशरा इव जयन्ति ॥ ४॥

रामानुजाय गुरवे नरवेषभाजे
शेषाय धूतकलये कलये प्रणामान् ।
यो मादृशानपि कृशान् परिपातुकामः

भूमाववातरदुदञ्चितबोधभूमा ॥ ५॥

रामानुजौ यामुनतीर्थसेवा-
परावुदीतौ नरकं निरोद्धुम् ।
तयोः पुराणः प्रणिनाय गीतां
तस्या नवीयस्तु ततान टीकाम् ॥ ६॥

यामुनतीर्थाश्रमिणौ
रामानुजमुनिर्मुकुन्दश्च ।
आद्यं त्रिवेणुधरमधिकं
अन्यदन्ताद्यमेकवेणुधरम् ॥ ७॥

नित्यं हेयगुणावधूननपराः नैर्गुण्यवादाः श्रुतौ
मुख्यार्थाः सगुणोक्तयः शुभगुणप्रख्यापनात् ब्रह्मणः ।
अद्वैतश्रुतयो विशिष्टविषयाः निष्कृष्टरूपाश्रया
भेदोक्तिः तदिहाखिलश्रुतिहितं रामानुजीयं मतम् ॥ ८॥

जयतु जगति लक्ष्मणार्यपक्षः
जयतु वचः श्रुतिमौलिदेशिकानाम् ।
जयतु निगमवर्त्मनिस्सपत्नं
जयतु चिराय च मूर्तिरञ्जनाद्रौ ॥ ९॥

(विश्वगुणादर्शचम्पूतः)

इति श्रीवेङ्कटाध्वरिगुरुभिरनुगृहीताः श्रीरामानुजवर्णनाश्लोकाः ।

॥ श्रीमते वेङ्कटाध्वरिणे नमः ॥

Proofread by Aruna Narayanan

*Shri Ramanuja Varnana Shlokah*
pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*